শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী গরুডদ্বাদশনামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী গরুডদ্বাদশনামস্তোত্রম্ ॥

অস্য শ্রী গরুড দ্বাদশ নাম স্তোত্র মহামন্ত্রস্য।
কাশ্যপ ঋষিঃ।
ত্রিষ্টুপ্ ছন্দঃ।
শ্রীগরুডো দেৱতা।
ওং বীজম্।
ক্ষং শক্তিঃ।
পং কীলকম্।
শ্রী গরুড প্রীত্যর্থে জপে ৱিনিযোগঃ॥

**ধ্যানম্**

অমৃতকলশহস্তং কান্তিসংপূর্ণদেহং
সকলৱিবুধৱন্দ্যং ৱেদশাস্ত্রৈরচিন্ত্যম্।
ৱিৱিধ ৱিমল পক্ষৈঃ ধূযমানাণ্ডগোলং
সকলৱিষৱিনাশং চিন্তযেৎ পক্ষিরাজম্॥

সুপর্ণঃ প্রথমং নাম দ্বিতীযং ৱৈনতেযকঃ।
নাগারিস্তু তৃতীযং স্যাৎ চতুর্থং নাগভূষণঃ॥ 1 ॥

জিতান্তকঃ পঞ্চমং স্যাৎ জিতামিত্রস্তু ষষ্ঠকম্।
অজিতঃ সপ্তমং চেতি অষ্টমং সর্ৱতোমুখঃ॥ 2 ॥

গরুত্মান্ নৱমং নাম দশমং তু খগেশ্ৱরঃ।
একাদশং তু তার্ক্ষ্যঃ স্যাৎ দ্বাদশং কশ্যপ নন্দনঃ॥ 3 ॥

দ্বাদশৈতানি নামানি গরুডস্য মহাত্মনঃ।
যঃ পঠেৎ প্রাতরুত্থায স্নানসন্ধ্যাদ্যনন্তরম্॥ **4** ॥

ৱিষং নাক্রমতে তস্য ন চ হিংসন্তি পন্নগাঃ।
সঙ্গ্রামে ৱ্যৱহারেঽপি জযমাপ্নোতি মানৱঃ।
বন্ধনান্মোক্ষমাপ্নোতি সর্ৱসিদ্ধিমৱাপ্নুযাৎ॥ **5** ॥

॥ শ্রী গরুডদ্বাদশনামস্তোত্রং সমাপ্তম্॥